# গোষ্ঠেশ্বরাষ্টকম্

{॥ গোষ্ঠেশ্বরাষ্টকম্ ॥}

সত্যজ্ঞানমনন্তমদ্বযসুখাকারং গুহান্তঃস্থিত-

শ্রীচিদ্ব্যোম্নি চিদর্ককরূপমমলং যদ্ ব্রহ্ম তত্ত্বং পরম্ ।

নির্বীজস্থলমধ্যভাগবিলসদ্গোষ্ঠোত্থবল্মীক-

সম্ভূতং সত্ পুরতো বিভাত্যহহ তদ্গোষ্ঠেশলিঙ্গাত্মনা ॥ ১॥

সর্বজ্ঞত্বনিদানভূতকরুণামূর্তিস্বরূপামলা

চিচ্ছক্তির্জডশক্তিকৈতববশাত্ কাঞ্চীনদীত্বং গতা ।

বল্মীকাশ্রযগোষ্ঠনাযকপরব্রহ্মৈক্যকর্ত্রী মুহুঃ

নৃণাং স্নানকৃতাং বিভাতি সততং শ্রীপিপ্পিলারণ্যগা ॥ ২॥

শ্রীমদ্রাজতশৈলশৃঙ্গবিলসচ্ছ্রীমদ্গুহাযাং মহী-

বার্বহ্ন্যাশুগখাত্মিকী বিজযতে যা পঞ্চলিঙ্গাকৃতিঃ ।

সৈবাশক্তজনেষু ভূরিকৃপযা শ্রীপিপ্পিলারণ্যগে

বল্মীকে কিল গোষ্ঠনাযকমহালিঙ্গাত্মনা ভাসতে ॥ ৩॥

যত্রাদ্যাপ্যণিমাদিসিদ্ধিনিপুণাঃ সিদ্ধেশ্বরাণাং গণাঃ

তত্তদ্দিব্যগুহাসু সন্তি যমিদৃগ্দৃশ্যা মহাবৈভবাঃ ।

যত্রৈব ধ্বনিরর্ধরাত্রসমযে পুণ্যাত্মভিঃ শ্রূযতে

পূজাবাদ্যসমুত্থিতঃ সুমনসাং তং রাজতাদ্রিং ভজে ॥ ৪॥

শ্রীমদ্রাজতপর্বতাকৃতিধরস্যার্ধেন্দুচূডামণে-

লোমৈকং কিল বামকর্ণজনিতং কাঞ্চীতরুত্বং গতম্ ।

তস্মাদুত্তরবাহিনী ভুবি ভবান্যাখ্যা ততঃ পূর্বগা

কাঞ্চীনদ্যভিধা চ পশ্চিমগতা নিলানদী পাবনী ॥ ৫॥

শ্রীমদ্ভার্গবহস্তলগ্নপরশুব্যাঘট্টনাদ্ দারিতে

ক্ষোণীধ্রে সতি বামদক্ষিণগিরিদ্বন্দ্বাত্মনা ভেদিতে ।

তন্মধ্যপ্রথিতে বিদারধরণীভাগেতিনদ্যাশ্রয়ে

সা নীলাতটিনী পুনাতি হি সদা কল্পাদিগান্ প্রাণিনঃ ॥ ৬॥

কল্পাদিস্থলমধ্যভাগনিলযে শ্রীবিশ্বনাথাভিধে

লিঙ্গে পিপ্পিলকাননান্তরগতশ্রীগোষ্ঠনাথাভিধঃ ।

শ্রীশম্ভুঃ করুণানিধিঃ প্রকুরুতে সাংনিধ্যমন্যাদৃশং

তৎপত্নী চ বিরাজতেঽত্র তু বিশালাক্ষীতি নামাঙ্কিতা ॥ ৭॥

শ্রীকাঞ্চীতরুমূলপাবনতলং ভ্রাজন্ত্রিবেণ্যুদ্ভবং

ত্যক্ত্বান্যত্র বিধাতুমিচ্ছতি মুহুর্যস্তীর্থযাত্রাদিকম্ ।

সোঽযং হস্তগতং বিহায কুধিযা শাখাগ্রলীনং বৃথা

যষ্ট্যা তাডিতুমীহতে জডমতির্নিঃসারতুচ্ছং ফলম্ ॥ ৮॥

শ্রীমদ্রাজতশৈলোত্থত্রিবেণীমহিমাঙ্কিতম্ ।

গোষ্ঠেশ্বরাষ্টকমিদং সারজ্ঞৈরবলোক্যতাম্ ॥ ৯॥

ইতি গোষ্ঠেশ্বরাষ্টকং সম্পূর্ণম্

Encoded by Sridhar - Seshagiri seshagir at engineering.sdsu.edu

goShTheshvarAShTaka.n is from a group of short poems of modern times from Coimbatore. goShTheshvara figuring in this hymn is kOTTai Ishvara, in the temple behind the municipal office in the town of Coimbatore. The rAjatashaila in verse 3 (and the last verse) is Valliangiri near Erode; guhA in verse 3 refers to a neighbouring place near BhavAni; triveNI in verse 8 is the sangam at BhavAni, of the KAveri, BhavAni and Noyyal; pippilAraNya in verse 3 is the old name of the place where the shrine of Perur, on the outskirts of Coimbatore, stands. kA~nchItaru in verse 5 is the kShetravRikSha at the Perur shrine and kA~nchInadI is the river Noyyal running nearby. nilAnadI is the river starting near Valliangiri. vishvanAtha and vishAlAkShI (verse 7) are the deities in the AvanAshi temple, 20 miles from Coimbatore. vidAradharaNI (in verse 6) is the landmark forming the TamilNadu Kerala border in this area.

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Goshteshwara Ashtakam Lyrics in Bengali PDF
% File name : goShTheshvara8.itx
% Category : aShTaka
% Location : doc_shiva
% Language : Sanskrit
% Subject : hinduism/religion
% Transliterated by : Sridhar Seshagiri sridhar.seshagiri at gmail.com
% Proofread by : Sridhar Seshagiri sridhar.seshagiri at gmail.com
% Description-comments : Hymn on goShteshvara, kOTTai Ishvara
% Latest update : February 13, 2002
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 12, 2015 ] at Stotram Website